काचि—दीप्तौ कर्त्तरि इन्। २मोक्षदसप्तपुर्य्यन्तर्गतपुरीभेदे च "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" काञ्चिरभिजनोऽस्य अण् तस्य बहुषु लुक्। ३पित्रादिक्रमेण तत्र वासिषु जनेषु पु० ब० व०। "भूतलस्यास्तजत् काञ्चीं च्छरभाश्व पार्श्वतः" भा०आ०१७५अ०। कृदिकारान्तत्वात् वा ङीप् उक्तार्थे। "वारिक्षोभात्तरितविहगश्रेणिकाञ्चीगुणायाः" मेघ०। "पुनः पुनः केशरदामकाञ्चीम्" "काञ्चीगुणस्थानमनिन्दितायाः" कुमा०। "माहिष्मतीवप्रनितम्बकाञ्चीम्" रघुः। मुक्तिस्थानानान्यकेनोत्यपक्रमे "काञ्ची च त्र्यम्बकं चापि सप्तगोदावरीतटम्" काशी०६अ० "जगाम नगरीं काञ्चीं कान्तां त्रिभुवनादपि। लक्ष्मीकान्तः स्वयं साक्षाज्जन्तूनां तत्र निवासिनः। श्रीकान्तानेव कुरुते परत्रेह च निश्चितम्। दृष्ट्वा काञ्चीं कान्तिमतीं कान्तिमद्भिर्निषेविताम्। कान्तिमानभवत् सोऽपि नाकान्तिस्तत्र कश्चचित्" काशीख०। इयञ्च द्विविधा शिवकाञ्ची विष्णुकाञ्ची च पु०प्रसिद्धा। काञ्चीपुरी च दक्षिणस्यां दृ०स०कूर्म्मविभागे उक्ता। अथ दक्षिणेन लङ्केत्युपक्रमे काञ्ची "मरुचीपट्टन चेर्य्यार्य्यकसिंहला ऋषभाः" इति। काञ्चीशब्दस्य प्रस्थशब्दे परे आद्युदात्तता। मेखलाभेदस्य "एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका। रशना षोडश ज्ञेया कलापः पञ्चविंशकः" इत्युक्तलक्षणः। अभेदोपचारादन्ययष्टिकायामपि वृत्तिरिति बोध्यम्। [हेमच०।

**काञ्चिक** न० काचि-बन्धने इन् संज्ञायां कन्। काञ्जिके

**काञ्चि(ञ्ची)पद** न० ६त०। जघने। हेमच०।

**काञ्जिक** न० अन्ज-धात्वर्थनिर्देशे ण्वुल् कुत्सिता अञ्जिका व्यक्तिर्यस्य। आरनाले (काँजि) हेमच०।

तस्य गुणादि भाव०प्र०उक्तं यथा "काञ्जिकं रोचनं रुच्यं पाचनं वह्निदीपनम्। शूलाजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम्" अन्यत्र वैद्यके च "संहितं धान्यमण्डादि काञ्जिकं कथ्यते जनैः। काञ्जिकम्भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु, दाहज्वरहरं स्पर्शात् पानाद्वातकफापहम्। माषादिवटकैर्यत्तु क्रियते तद्गुणाधिकम्। लघु वातहरं तत्तु रोचनं पाचनम्परम्। शूलाजीर्णविबन्धानां नाशनं वस्तिशोधनम्। धान्याम्लमच्छतरमामनिवारि हारि शुण्ठीरजोलवणजीरकसंस्कृतं यत्। आवासितं सुरभि हिङ्गुकणेन यत्नात् तेनाशुशुष्कणिकणोऽधिकतां प्रयाति। एलामहौषधविभावितमाषिमन्यं संसिद्धमामलकमेदककाञ्जिकं यत्। मन्दं विवर्द्धयति जाठरवीतिहोत्रं निर्वाणदीपमिव गन्धकचूर्णयोगः। काञ्जिकं रुचिदं हृद्यं स्वच्छमग्निकरं परम्। वातघ्नं बलदं श्रेष्ठं गुर्वाहारस्य पाचकम्"। अन्यत्र च "काञ्जिकं दधितैलन्तु बलीपलितनाशनम्। गात्रशैथिल्यदानाय मर्द्दनाच्च च भक्षणात्"। भावप्र० तद्भेदतद्विधानाद्युक्तं यथा—"कुल्माषधान्यमण्डेन संहितं काञ्जिकं भवेत्। यन्मस्त्वादि शुचौ भाण्डे सगुडं चौद्रकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते। तुषाम्बु संहितम् ज्ञेयमामैर्विदलितैर्यवैः। यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत्। आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः। पक्वैर्वा संहितैस्तत्तु सौवीरसदृशं गुणैः। कल्माषधान्यमण्डादि संहितं काञ्जिकं विदुः। शिण्डिका संहिता ज्ञेया मूलकैः सर्षपादिभिः"।

**काञ्जिकवटक** पु० (काँजिवडा) प्रसिद्धे भावप्रकाशोक्ते वटकभेदे तद्विधानगुणादि तत्रोक्तं यथा "मन्थनी नूतना धार्य्या कटुतैलेन लेपिता। निर्म्मलेनाम्बुनापूर्य्य तस्यां चूर्णं विनिःक्षिपेत्। राजिकाजीरलवणहिङ्गुशुण्ठीनिशाकृतान्। निःक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत्। ततोदिनत्रयादूर्द्ध्वमम्लाः स्युर्वटका ध्रुवम्। काञ्जिकी वटकोरुच्यो वातघ्नः श्लेष्मकारकः"। शीतोदाहं शूलमजीर्णं हरते दृगामयेष्वहितः"।

**काञ्जिका** स्त्री ईषदञ्जिका अन्ज-ण्वुल् अत इत्त्वम् कोः कादेशः। १जीवन्तीलतायां २पलाशीलतायां राजनि०। वैद्यकोक्ते सार्षपकन्देन कृते व्यञ्जनभेदे तल्लक्षणं यथा "सार्षपीकन्दली सूक्ष्मा खण्डिता स्निग्धभाजने। स्थापिता सखण्डसहिता त्वथ वा तण्डुलोदके। सप्तरात्रात् परं चुक्रं ततः सम्यक् प्रजायते। तस्मादेव समाकृष्य तत्रयेदाप्रलेहयेत्। काञ्जिकेति समाख्याता सूदधर्म्मोपजीवकैः। सार्षपस्य गुणा ये हि ते चास्या अपि कीर्त्तिताः"।

**काञ्ची** स्त्री कं जलमनक्ति अन्ज-अण् उप०स० गौरा० ङीष् पा०, सुश्च० षण् ईप्। महाद्रोणीहक्षे राजनि०

**काट** पु० कं जलमच्यते प्राप्यतेऽत्र अट-आधारे घञ्। १कूपे निरु०। "इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाह्लः" ऋ०१,१०६,६, "कूटयास्य संशीर्य्यन्ते स्रोणया काटमर्द्दति" अथ०१२,४,३, २विषममार्गे वेददी०।

**काटुक** न० कटुकस्य भावः युवा० अण्। कटुकत्वे।